S. Gans

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. me

Ser. 1

Title: Shiva Rahasya

M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref. / Ser. 1
Title: Shiva Rahasya

D. I. Gaur

Incomplete.

Shiva Rahasya	Title
	Author
	Editor
	Year, Vols.
	Publisher
	Remarks

1

॥श्रीगणेशायनमः॥शिवरहस्ये शिवउवाच॥निःकलानिरवद्यासाशिवा
नीशिवरूपिणी॥दृष्टात्रविष्णुना पूर्वंमन्त्रादिविद्याय शाश्वती॥१॥तांतादृशीमुमां
दृष्ट्वाविष्णुःसंतुष्टमानसः॥प्रणम्यदंडवद्भूमौपूजयामाससादरं॥२॥ततस्तुष्टा
शिव॰ वतांविष्णुरादिविद्यांमहेश्वरीं॥कृतांजलिपुटोभूत्वाप्रणम्यचमुहुर्मुहुः॥३॥
१ विष्णुरुवाच॥जयमातर्जगद्वंद्येजयविश्वेश्वरप्रिये॥जयकल्याणदेनव्येजयसौ
भाग्यसंश्रये॥४॥जयकल्याणनिलयेजयवेदांतसंस्तुते॥जयपुण्यैकनिलयेज
यकारुण्यसंश्रये॥५॥जयवेदांतसंवेद्येजयनित्येनिरंजने॥जयविद्यैकनिलयेज
यापर्णेजयामले॥६॥जयमंजुलमंदारपुष्पमालाविराजिते॥जयनीलोत्पलानी राम
लसन्नयनपंकजे॥७॥जयसर्वकलापूर्णचंद्रबिंबनिभानने॥जयविद्रुमबिंबा १
भवाधरविराजिते॥८॥जयदाडिमबीजाभदंतराजिविराजिते॥जससिंदूरसंब

द्धसीमंतललितालके॥९॥जयपन्नारसंबद्धघुरुणारुणालके॥जयकंबुनिभा
पूर्णीकंठमंडलशोभिते॥१०॥जयहेममृणालाभबाहुवल्लीविराजिते॥जयकोक
नदारक्तहस्तपद्मविराजिते॥११॥जयकारुण्यपीयूषपूर्णवक्षोजशोभिते॥ज
यकामजमोसन्नरोमराजीविराजिते॥१२॥जयत्रिवलिसंबद्धविलसत्तनुनोदरे॥
जयसिंदूरकदलीसन्निभोरुमनोहरे॥१३॥जयदेवनतापूतविलसत्पदपंकजे॥
जयानवद्येनिर्द्वंद्वेनिर्मलेलयवर्जिते॥१४॥जयविद्येमहाविद्येजयानंदेजयोत्त
मे॥जयलीलाविलासार्थस्वीकृतामलविग्रहे॥१५॥जयमौनिमनोरम्यसिंहासन
वराश्रये॥जयरत्नोच्चवलयरत्नावलिविराजिते॥१६॥जयदिव्यमणिभ्राजद्धेमा
भरणशोभिते॥जयमातर्महादिविद्येजयमातर्महेश्वरी॥१७॥जयमातस्त्रिनयने
जयमातःसुरेश्वरि॥जयमातःप्रसीददेवेजयमातःशिवप्रिये॥१८॥जयमातःकृपा

पूर्णेजयमातःपरात्परे॥किंध्यायतेत्वयादेविध्यातव्यंतत्कथंशिवे॥१९॥ध्येया
त्वमेवसर्वेषांभुक्तिमुक्तिप्रदायिनि॥ध्येयध्यातृस्वरूपात्वंध्यानगम्याकथंशि
वे॥२०॥दासास्तवैवसर्वेपिवयंब्रह्मादयःशिवे॥दास्यस्तवास्मदादीनांदेवानां॥
शिव २ वनिताःशिवे॥२१॥देवतासर्वगोमस्यशिवस्यार्द्धांगभागिनी॥त्वमस्यतस्त्वयादे
विकिमत्रध्यायतेवद॥२२॥पार्वत॰॥शरीरार्द्धमहंत्वन्नोर्येनमात्रास्मिकेशव॥
तदिदानींसमाचक्ष्वस्तोत्रंशीघ्रफलप्रदं॥२३॥विष्णुरु॰॥शरीरार्द्धमहेशस्यत्वा
प्तमेवत्वयाशिवे॥त्वमेवशिवरूपासितवाप्राप्यंनदृश्यते॥२४॥तथापिपृच्छते
देविलोकानुग्रहवांछया॥तयातदोहंवक्ष्यामिस्तोत्रमेकंशिवप्रदं॥२५॥पुत्री शिव २
हंतवकल्याणितवात्सल्यभावतः॥मयासहत्वयादेविशिवेसंभाषणंकृतं॥२६॥
तवयत्पदपद्मंतत्सर्ववेदांतसंस्तुतं॥दृष्टंमयाकृतार्थोस्मित्वत्पादांबुजवीक्षणा

ति

त्॥२७॥संपन्नपसिजगद्वंद्येकृपयातमनेकधा॥पूर्णजयंसुराःसिद्धामुनयश्चनसंश
यः॥॥२८॥लक्ष्म्याद्याःसुभगाजातास्त्वत्पादांबुरुहार्चनात्॥त्वत्पादपद्मंसततंध्या
यंतिकमलालिनि॥२९॥त्वमादिशक्तिःपरमासर्ववेदांतसंस्तुता॥त्वमोंकारस्व
रूपात्वंसर्ववेदांतरूपिणी॥३०॥त्वमाद्यंतविहीनात्वंसच्चिदानंदरूपिणी॥विज्ञा
नसारिणीसाक्षात्ज्ञानधाराविनोदिनी॥३१॥कलाकाष्ठामुहूर्तादिकालोन्नय
नकारिणी॥त्वत्तएवसमुत्पन्नावयंब्रह्मादयःसुराः॥३२॥त्वत्तएवसमुत्पन्नालो
काःसर्वेपिशांभवी॥तवनेत्रमयंचंद्रःसूर्योग्निश्चमहेश्वरि॥३३॥तवैवमूर्तयःस
र्वेपवनाद्याःशिवप्रिये॥त्वदन्योदृश्यतेनात्रत्वमेवसकलंशिवे॥३४॥निष्कलापि
त्वमेवासिसकलासित्वमीश्वरी॥त्वमेवसकलादेविसृष्टिस्थित्यंतकारिणी॥३५॥
त्वमेवनिष्कलादेविसर्वोपाधिविवर्जिता॥प्रार्थात्वमेवसर्वेषांमुक्तिरूपास्यवत॥३६॥
त्वामीदृशींविदित्वैवसच्चिदानंदलक्षणां॥भजंतिमुनयःसर्वेनित्यंवेदैःस्तुवंतिच॥
॥३७॥

ईदृशींत्वंनिराकारासाकारैवाद्यदृश्यते॥यतस्त्वमसिविज्ञानमतोरूपंनतेध्रुवं॥३९॥
त्वंतपोदायागानांफलदासिशिवप्रिये॥त्वामुद्दिश्यैवमुनिभिःसततंतप्यतेतपः॥
४०॥संतुष्टातपसादेविददासिपरमंपदं॥सुप्रीतायास्तवोमित्रनादेयंवस्तुदृश्यते॥
४०॥शिवेत्वयैवसृष्टानिवैकुंठादिपदान्यपि॥तानिदत्तानिचास्मभ्यंत्वयैवार्चित
याध्रुवं॥४१॥यतःशिवस्त्वमेवासिततोदत्तंशिवेनयत्॥तत्त्वयैवध्रुवंदत्तंसर्वैक
शिव· स्यार्णसंश्रये॥४२॥रत्नराशेर्मनोज्ञानिरत्नानिचमयापुरा॥वेदराशेर्गृहीतानिशि
३ वनामानिशोभने॥४३॥संत्यनंतानिनामानिमहादेवस्यशोभने॥तानिसर्वाणिनामानि
पावनानिनसंशय॥४४॥तानिदिव्यानिदिव्यानिनामानिप्रसिद्धानिवरानने॥बहुन्य
न्यपितत्रैषांनाहंतिरतिदुर्लभा॥४५॥अस्तिगुप्ततमंदेविनाम्नामष्टोत्तरंशतं॥ शिव·
शंभोरहंप्रवक्ष्यामिपठतांशीघ्रकामदं॥४६॥शिवोमहेश्वरःशंभुःपिनाकीशशि ३
शेखरः॥वामदेवोविरूपाक्षःकपर्दीनीललोहितः॥४७॥शंकरःशूलपाणिश्चखट्व

ट्वांगीविष्णुवल्लभः॥शिपिविष्टोंबिकानाथःश्रीकंठोभक्तवत्सलः॥४८॥भवःशर्वस्त्रि
लोकेशःशितिकंठःशिवाप्रियः॥उग्रःकपालीकामारिरंधकासुरसूदनः॥४९॥गंगा
धरोललाटाक्षःकालकालःकृपानिधिः॥भीमःपरशुहस्तश्चमृगपाणिर्जटाधरः॥
५०॥कैलासवासीकवचीकठोरस्त्रिपुरांतकः॥वृषांकोवृषभारूढोभस्मोद्धूलि
तविग्रहः॥५१॥सामप्रियःस्वरमयस्त्रयीमूर्तिरनीश्वरः॥सर्वज्ञःपरमात्माचसोम
सूर्याग्निलोचनः॥५२॥हविर्यज्ञमयःसोमःपंचवक्त्रःसदाशिवः॥विश्वेश्वरोवीरभद्रो
गणनाथःप्रजापतिः॥५३॥हिरण्यरेतादुर्धर्षोगिरीशोगिरिशोनघः॥भुजंगभूष
णोभर्गोगिरिधन्वागिरिप्रियः॥५४॥कृत्तिवासाःपुरारातिर्भगवान्प्रमथाधि
पः॥मृत्युंजयःसूक्ष्मतनुर्जगद्व्यापीजगद्गुरुः॥५५॥व्योमकेशोमहासेनजन
कश्चारुविक्रमः॥रुद्रोभूतपतिःस्थाणुरहिर्बुध्न्योदिगंबरः॥५६॥अष्टमूर्तिर
नेकात्मासात्विकःशुद्धविग्रहः॥शाश्वतःखंडपरशुरजःपाशविमोचकः॥५७॥

मृड।पशुपतिर्देवोमहादेवोव्ययःप्रभुः॥पूषदंतभिदव्यग्रोदक्षाध्वरहरोहरः॥भ
गनेत्रभिदव्यक्तःसहस्राक्षःसहस्रपात्॥अपवर्गप्रदोनंतस्तारकःपरमेश्वरः॥
५०॥इमानिदिव्यनामानिजप्यंतेसर्वदामया॥नामकल्पलतेयंमेसर्वाभीष्टप्र
दायिनी॥६०॥नामान्येतानिसुभगेशिवदानिनसंशयः॥वेदसर्वस्वभूतानिनामा
न्येतानिवस्तुतः॥६१॥एतानियानिनामानितानिसर्वार्थदान्यतः॥जप्यंतेसादरंनि
शिव. त्यंमयानियमपूर्वकं॥६२॥वेदेषुशिवनामानिश्रेष्ठान्यघहराणिच॥संत्यनंतानिसु
४ भगेवेदेषुविविधेष्वपि॥६३॥तेभ्योनामानिसंगृह्यकुमारायमहेश्वरः॥अष्टोत्त
रसहस्रंतुनाम्नामुपदिशत्पुरा॥६४॥तानिनामानिजप्यंतेमयाप्रत्यहमादरात्॥६५
इत्युक्त्वाप्रणिपत्यांबांसंहृष्टःपचजनार्दनः॥ततोजगामवैकुंठंप्रेषितोजगदंबया॥६६ सिव.
शिवमाराधयंतीसागिरिजापितस्ततःशिवं॥संप्राप्यविरक्तासासान्नद्युयःप्राप्तशिवापि ४
सा॥६७॥ ॥शिवरहस्येसप्तमांशे॥शात्रयोदशोध्यायः॥ ८ ॥श्रीविजीकल्याण